५

वैदिकाख्यानं दार्शनिकानां नये वेदविमर्शः च

प्रस्तावना

अस्मिन् पाठे वयं वेदे वर्णितानां केषाञ्चन आख्यानानां वर्णनं द्रक्ष्यामः। यथा लौकिककथाग्रन्थान् रसालङ्कारगुणयुक्तशब्दराशिभिः कवयः रचितवन्तः। तथैव वैदिककाले अपि सामाजिकरीत्यादिकं वैदिकोपाख्याननाम्ना अध्यायेन वयमत्र द्रक्ष्यामः। कथाग्रन्थेषु यथा कान्तासम्मितं वचो वर्तते, तथैव नीतिपूर्णानि वचांसि तथा प्रभुसम्मितैः उपदेशैः नीतिज्ञानं वेदोपाख्यानेषु केषुचित् स्थलेषु प्राप्यते। केषाञ्चन उपाख्यानानां विषये वयमत्र पठिष्यामः। ततः आख्यानं प्रतिपाद्य विविधदार्शनिकानां मते वेदः प्रतिपादितः विद्यते। एवञ्च वेदस्य पौरुषेयत्वम् अपौरुषेयत्वम् इति विचारः प्रवर्तते। पुरुषेण कृतः पौरुषेयः। सृष्टस्य एव अनित्यत्वापत्तिः। यतो हि यस्य सृष्टिः अस्ति तस्य विनाशः अवश्यम्भावी। जन्यपदार्थानाम् अनादित्वस्य असम्भवात् ते अनित्याः इति। ते कदापि अपौरुषेयाः भवितुं नार्हन्ति।अतः ते अनित्याः पौरुषेयाः च। वेदः पौरुषेय अपौरुषेयो वा इति विषये दार्शनिकानां नानामतानि सन्ति। न्यायवैशेषिक-मीमांसक-सांख्य-वैयाकरणमते वेदस्य पौरुषेयत्वम् अपौरुषेयत्वञ्च नित्यत्वम् अनित्यत्वञ्च प्रस्तूयते।

उद्देश्यानि

इमं पाठं पठित्वा भवान् -

- आख्यानविषये विशिष्टं ज्ञानं प्राप्तुं शक्नुयात्।
- शुनःशेपोपाख्यानम्, ऊर्वशी-पुरूरवसोः उपाख्यानं च ज्ञातुं शक्नुयात्।
- स्वयमपि आख्यानादिकं रचयितुं शक्नुयात्।
- वेदस्य पौरुषेयत्वापौरुषेयत्वविषये लघुप्रबन्धं रचयितुं शक्तो भवेत्।
- वेदविषये नैयायिकानां साङ्ख्यानां मतानि ज्ञातुं प्रभवेत्।

५.१) शुनःशेपोपाख्यानम्

शुनःशोपोपाख्यानम् ऋग्वेदस्य बहुषु सूक्तेषु प्राप्यते (१/२४-२५)। तेन इयं घटना सत्याश्रिता आसीत् इति प्रतीयते। ऐतरेयब्राह्मणे (७/३) इदमाख्यानम् अतिविस्तरेण वर्णितम् अस्ति। इदम् उपाख्यानम् आदौ हरिश्चन्द्रस्य अन्ते च विश्वामित्रस्य सम्बन्धं परिकल्प्य परिवर्धितम् अस्ति। वरुणस्य कृपातः इक्ष्वाकुनृपस्य हरिश्चन्द्रस्य गृहे पुत्रोत्पन्नः अभवत्। समर्पणसमये अरण्ये हरिश्चन्द्रस्य पुत्रस्य पलायनम्, हरिश्चन्द्रस्य उदरजन्यरोगोत्पत्तिः, मार्गे अजीगर्तस्य मध्यमपुत्रस्य शुनःशेपस्य क्रयणं, देवतायाः कृपातः तस्य शुनःशेपस्य शापात् मुक्तिः, विश्वामित्रेण शुनःशेपस्य पुत्रत्वेन स्वीकारः इत्येते विषयाः आलोच्यन्ते। तथाहि कथा एवं श्रूयते-

कश्चित् हरिश्चन्द्रः नामकः निःसन्तानः राजा आसीत्। वरुणम् उपास्य सः पुत्रं लब्धवान्। वरुणेन उक्तं च यत्, उत्पन्नस्य पुत्रस्य त्वया मह्यं बलिर्देया इति। द्वादशवर्षीयो रोहितः वनं जगाम। वरुणस्य कोपेन हरिश्चन्द्रो जलोदररुजा ग्रस्तो बभूव। यदा यदा रोहितो वनात् गृहे गन्तुमना बभूव तदा तदा इन्द्रः तस्मै चरैवेति चरैवेति उपदिष्टवान्। अन्ते पितुः दुःखं सोढुम् असमर्थः सः गृहं प्रत्यागच्छन् मध्ये मार्गम् अजीगर्तनामकस्य ब्राह्मणस्य मध्यमं पुत्रं शुनःशेपं बलिकर्मणे क्रीतवान्। आयोजिते यज्ञे यूपे संयतं शुनःशेपं शतगोमूल्येन यदा हन्तुम् उद्यतो बभूव तस्य पिता अजीगर्तः तदा विश्वामित्रः शुनःशेपाय गाथात्रयम् उपादिशत्, यासां पाठमात्रेण वरुणो बलिं विना प्रसन्नो बभूव। अनन्तरं विश्वामित्रः शुनःशेपं पोष्यपुत्रं कृत्वा स्वकीयेषु शतसङ्ख्याकेषु पुत्रेषु एकपञ्चाशत्तमं पुत्रं चकार। येन तस्मादधो विद्यमानाः रुष्टाः विश्वामित्रपुत्राः विश्वामित्रस्यैव शापेन आन्ध्र-पुलिन्द-म्लेच्छादिकाः भूत्वा तत्र तत्र निवसन्ति स्म। शुनःशेपाख्यानम् ऋक्शतगाथोपरि आश्रितम्, इति एतरेयब्राह्मणस्य "ऋक्शतगाथं शौनःशेपमाख्यानम्" इत्यतः स्वीकृतो विद्यते।

पाठगतप्रश्नाः -१

१. शुनःशेपोपाख्याने आद्यन्तयोः कौ परिकल्पितौ।
२. हरिश्चन्द्रस्य पुत्रः कस्य आशिषि जातः।
३. शुनःशेपस्य पितुः नाम किम्।
४. कस्मिन् वेदे आख्यानम् इदं प्राप्यते।
५. शुनःशेपः कस्य पोष्यपुत्रः आसीत्।
६. गाथात्रयं कः कस्मै श्रावितवान्।

५.२) ऊर्वशी-पुरूरवसोः उपाख्यानम्

वैदिकयुगस्य इयमेका रोमाञ्चकारिणी प्रणयगाथा अस्ति। नरपतिना पुरूरवसा सह ऊर्वशी प्रणयपाशे आबद्धा बभूव इति। एतदर्थं पणत्रयम् आसीत्। तद्यथा-

१) सा सदैव घृताहारं करिष्यति।

२)तस्याः द्वौ प्रियौ भेडकौ सदैव तस्याः पर्यङ्किकापार्श्वे रज्जुभ्यां बद्धौ भविष्यतः, येन कोऽपि तौ आहर्तुं न शक्ष्यति, न चोरयिष्यति वा।

३) कस्यामपि अवस्थायां सा राजानं नग्नं द्रष्टुं न शक्ष्यति यदि क्षणमपि एवं भवेत् तदा सा तं विहाय गमिष्यति।

राजा उर्वश्याः पणत्रयं सहर्षं स्वीकृवान्। तया सह सानन्दं समयं यापयति स्म। किञ्च उर्वशीं विना गन्धर्वाः स्वर्गं नीरसं निर्जीवञ्च अनुभूतवन्तः। ततस्ते कपटप्रबन्धेन ग्लहभङ्गं कर्तुं समुद्यताः अभवन्। रात्रौ एकदा ते गन्धर्वाः कपटेन मेषमेव उर्वशीपार्श्वाद् अचोरयन्। मेषस्य करुणध्वनिं श्रुत्वा एव उर्वशी राजानं चौरेण सह योद्धुं प्रेरितवती। राजा अपि शीघ्रमेव मेषं चौरात् त्रातुम् आकाशम् प्रति अधावत्। तदैव आकाशे विद्युत्-प्रकाशे गधर्वाः छलेन राज्ञः नग्नस्थं रूपमुर्वशीम् अदर्शयन्। राजानं नग्नं दृष्ट्वा सापि तदैव बहिः अगच्छत्। राजा तां विना विरहातुरो भूत्वा उन्मत्त इव भूमण्डले विचचार। एकदा कुरुक्षेत्रस्य एकस्मिन् जलाशये हंसी-रूपेण स्वप्रियाम् अपश्यत्। प्रत्यावर्त्तनाय तां स राजा बहुवारं प्रार्थयामास। सा तु राज्ञः पार्श्वे पुनः आगमनाय समुद्यता न बभूव। राज्ञः दयनीयां दशां दृष्ट्वा गन्धर्वाणामपि हृदये सहानुभूतिः उत्पन्ना बभूव। सः अपि तस्यै अग्निविद्याम् उपदिष्टवान्। तस्य अनुष्ठानेन सः उर्वश्याः अविच्छिन्नसमागमम् अलभत्।

ऋग्वेदस्य प्रख्यातसूक्ते(१०/९५) उभयोः कथोपकथनमात्रमेव अस्ति। शतपथब्राह्मणे(१/१/५/१) कथानकमिदं रोचकं विस्तरेण सह वर्णितमस्ति। तत्र अस्य कथानकस्याङ्कने साहित्यिकसौन्दर्यस्यापि परिचयः प्रदत्तः अस्ति। विष्णुपुराणे(४/६), मत्स्यपुराणे(अ–२४), भागवत्पुराणे(९/१४) च अस्य कथानकस्य रोचकं विवरणं वयम् प्राप्नुमः। महाकविना कालिदासेन विक्रमोर्वशीयनाम्नि त्रोटके अस्मै कथानकाय नितान्तं मञ्जुलं नाटकीयरूपं प्रदत्तम्। अस्य आख्यानस्य विकासे एकस्य विशेषतथ्यस्य सत्ता प्राप्यते। पुराणेषु कथानकमिदं प्रणयगाथारूपेण व्यक्तम् अस्ति। किञ्च वैदिकाख्याने पुरूरवाः प्रथमा व्यक्तिः अस्ति, यो हि श्रौताग्निः अर्थात् आहवनीयः, गार्हपत्यः दाक्षिणाग्निश्च इति नामकस्य त्रिविधस्य अग्नेः स्थापनाय रहस्यं ज्ञात्वा यज्ञसंस्थायाः प्रथमं विस्तारं कृतवान्। पुरूरवसोऽस्य परोपकारिरूपस्याभिव्यक्तिभिः अस्य वैदिकाख्यानस्य अस्य वैशिष्ट्यं विदधाति।

पाठगतप्रश्नाः - २

७. पुरुरवाः कामुपयेमे।

८. उर्वशी कथं राजानं परित्यक्तवती।

९. उर्वशी का।

१०. उर्वश्या प्रदत्तपणं राजा कथं स्वीकृतवान्।

११. प्रथमपणस्य नाम किम्।

१२. उर्वशीं विना स्वर्गस्य का दशा अभवत्।

१३. के मेषं चोरितवन्तः।

१४. राजा कथम् आकाशं प्रति अधावत्।

१५. उर्वशी कथं स्वर्गं गतवती।

१६. राजा कुत्र स्वप्रियां दृष्टवान्।

१७. किं कृत्वा राजा उर्वशीं प्राप्तवान्।

१८. उर्वशी–पुरोरवसोः उपाख्यानात् कलिदासः किं नाटकं रचितवान्।

१९. आहवनीयगार्हपत्यदक्षिणाग्नीनां रहस्यं कः प्रथमं विस्तारितवान्।

५.३) च्यवानभार्गवस्य तथा मानवीसुकन्याख्यानम्

आख्यानमिदं भारतीयनारीचरित्रस्य एकं नितान्तमुज्ज्वलं दृष्टान्तं समुपस्थापयति। कथा इयम् ऋग्वेदस्य आश्विनेन सम्बद्धासु सूक्तेषु(१/११६,११७ प्रभृतयः) सङ्केतिता अस्ति। इयमेव कथा ताण्ड्यब्राह्मणे(१४/६/११),निरुक्ते (४/१९) शतपथब्राह्मणे (का. ४), भागवत्पुराणे (स्क.९अ. ३) च अतिविस्तरेण प्राप्यते। च्यवनस्य वैदिको नाम 'च्यवानः' इति अस्ति। सुकन्यायाः वैदिककथा तस्याः पौराणिककथापेक्षया अधिकोदात्ता आदर्शमयी च अस्ति। पुराणेषु सुकन्याऽपराधिनी स्वयमस्ति। च्यवनस्य दिव्याक्षणोः स्फोटनं सा करोति। अस्मै कर्मणे तस्यै दण्डविधानं स्वाभाविकमेव अस्ति। किञ्च वेदे तस्याः त्यागः उच्चकोटेः अस्ति। सैनिकबालकेभ्यः निवारणाय कृतापराधस्य च्यवानस्य सम्मुखे सा आत्मसमर्पणं करोति। तस्याः दिव्येन प्रेम्णा प्रभावितो भूत्वा तं वार्द्धक्यात् मुक्तं कृतवान्। अश्विनौ तस्मै नूतनं यौवनम् दत्तवन्तौ।

तुलनात्मकाध्ययनेन प्रतीतो भवति यद् अनेकानि आख्यानानि कालान्तरे विकृतानि भवन्ति। विकासप्रक्रियायाम् अनेकावान्तरकालिकी घटना विद्यते। ताः आख्यानेभ्यः संश्लिष्टौ भूत्वा तानि अभिनवरूपाणि ददति। एतानि परिवर्तितरूपाणि मूलरूपतो भिन्नानि भवन्ति। शुनःशेपस्य, विश्वामित्रवसिष्ठयोः कथानकयोः अनुशीलनेन अस्य विचित्रसिद्धान्तस्य प्रदर्शनेन दृष्टान्तः समुपस्थापितो

भवति। शुनःशेपस्य आख्यानम् ऋग्वैदस्य प्रथममण्डले (सू २४,२५) स्पष्टतः सङ्केतितः अस्ति। अस्य एव विस्तार ऐतरेयस्य समयपञ्चिकायाम् उपलब्धो भवति। अत्र शुनःशेपस्य आख्यानमारम्भे राज्ञः हरिश्चन्द्रस्य पुत्रः रोहिताश्वेन सह तथा कथान्ते मुनिना विश्वामित्रेण सह सम्बद्धो भूत्वा भव्यम् एकं धारयति। कालान्तरे अस्मिन् कथानके रोचकतावर्द्धनाय एव तस्य भ्रातृद्वयस्य, पितुः दरिद्रतायाः तस्य विक्रयणस्य च परिकल्पना कृता इति प्रतीतो भवति। शुनःशेपस्य अपि अत्र अर्थः न भवति 'कुक्कुरः'। 'शुनः'–शब्दस्य अर्थो भवति 'सुखम्' कल्याणञ्च इति तथा 'शेप'–शब्दस्य अर्थो भवति 'स्तम्भः'। अतः शुनःशेपस्य अर्थो भवति 'सौख्यस्य स्तम्भः'। अनेन प्रकारेण कथानम् इदं वरूणपाशाद्विमुक्तेः सन्देशं ददत् कल्याणस्य मार्गं प्रशस्तयति।

पाठगतप्रश्नाः- ३

२०. भारतीयनारीचरित्रस्य नितान्तमुज्वलदृष्टान्तस्य नाम लिखत ।
२१. च्यवनस्य वैदिको नाम कः।
२२. च्यवनस्य दिव्याक्ष्णोः स्फोटनं का कृतवती।
२३. शुनःशेपस्य कः अर्थः।

५.४) वशिष्ठविश्वामित्रयोः आख्यानम्

ऋग्वेदे स्वतःसङ्केतितम् इदम् आख्यानम् अस्ति। इमौ ऋषी सम्भवतो भिन्न-भिन्न-काले राज्ञः सुदासस्य पुरोहितौ आस्ताम्। चातुर्वर्ण्यस्य क्षेत्राद् बहिःयुगस्य इमौ ऋषी आस्ताम् इति स्वीकर्तुमिति शक्यते। उभयोः मध्ये परमसौहार्द्रभावनायाः साम्राज्यम् आसीत्। उभौ तपःपूतौ, तेजःपुञ्जौ, अलौकिकगुणशालिनौ महापुरुषौ आस्ताम्। किञ्च अवान्तरग्रन्थेषु रामायण-पुराण-बृहद्देवतादिषु उभयोः मध्ये सङ्घर्ष-वैमनस्य-विरोधादिकल्पनायाः उदयः अभवत्। विश्वामित्रः क्षत्रियाद् ब्राह्मणत्वप्राप्त्यर्थं लालायितः अभवत्। वसिष्ठेन स अङ्गीकृतः भवति। तेन क्रुद्धो भूत्वा विश्वामित्रो वसिष्ठस्य पुत्राणां संहारकः अभवत्। इमामेव कल्पनाम् आधारीकृत्य आलोचकाः क्षत्रियब्राह्मणयोः मध्ये घोरविद्रोहस्य अमङ्गलस्य च प्राचीरं स्थापितवन्तः। वस्तुतो विचारोऽयं निराधारः, उपेक्षणीयः तथा नितान्तभ्रामकोऽस्ति। वैदिकाख्यानेन अपरिचिता व्यक्तिः एव एवंविधानां पावनचरित्राणाम् ऋषीणाम् अवान्तरकालिकवर्णनेन भ्रान्तो भवति। वैदिकाऽऽख्यानानां विकासः अवान्तरयुगे केन प्रकारेण सम्पन्नः अभवत् इति अध्ययनस्य एको गम्भीरो विषयः अस्ति। कतिपयानाम् आख्यानानां विकासस्य इतिहासः रोचकरीत्या विद्वद्भिः वर्णितः अस्ति।

पाठगतप्रश्नाः ४

२४. वसिष्ठविश्वामित्रयोः आख्यानं कुत्र अस्ति।

२५. राज्ञः सुदासस्य द्वौ परोहितौ कौ।

२६. विश्वामित्रः कः वर्णीयः आसीत्।

२७. कस्य वर्णस्य प्राप्त्यर्थं सः लालायितः अभवत्।

५.५) आख्यानानाम् तात्पर्यम्

वैदिकाख्यानानां तात्पर्यं किमस्ति। अस्य प्रश्नस्य उत्तरे विद्वत्सु वैमत्यं विलोक्यते। अमेरिकास्थः विद्वान् डॉ ब्लूमफील्डमहोदयः अस्य विषयस्य चर्चां कृत्वा तेषां विदुषां मतस्य खण्डनम् अकरोत्। ये विद्वांसः वैदिकाऽऽख्यानस्य रहस्यवादिनीं व्याख्यां कृतवन्तः। उदाहरणार्थम्- एते रहस्यवादिनो वैदिकाः आख्यानाऽभ्यन्तरे एकस्य गम्भीररहस्यस्य दर्शनं कुर्वन्ति। तेषां विचारे पुरूरवाः सूर्यः तथा उर्वशी उषा अस्ति। उषस्-सूर्ययोः पारस्परिकसंयोगः क्षणिको भवति। तयोः वियोगकालः अतिदीर्घः अस्ति। वियुक्तः सूर्यः उषान्वेषणे आदिवसं तत्पश्चाद् भ्रमति। अन्येद्युः प्रभाते तयोः मेलनं भवति। प्राचीनभारतीयविदुषां वैदिकाऽख्यानस्य इदमेव स्वरूपम् आसीत्। अतो मानवीयमूल्यविहीनानां वैदिकाऽख्यानानां चित्रणं कथमपि न्याय्यमुपयुक्तञ्च नास्ति।

एतेषाम् आख्यानानाम् अनुशीलनस्य विषये तथ्यद्वयम् अवधेयम्-

क) ऋगवेदीयाऽख्यानम् एवंविधान् विचारान् सारयति वर्णयति च यत् मानव-समाज-कल्याण-साधनाय नितान्तम् अपेक्षितं भवति। अस्य अध्ययनमपि तथैव मानवीयमूल्यदृष्ट्या कर्तव्यम्। ऋग्वेदीय-ऋषिः एतेषु आख्यानेषु मानवानां कल्याणमयोपादेयतत्त्वानां समावेशं कृतवान्।

ख) तस्य एव युगस्य वातावरणं स्मृत्वा तस्मिन्नेव परिवेशे एतेषाम् उपाख्यानानां मूल्यनिर्धारणं कर्तव्यम्। तस्मिन्नेव युगे एतेषाम् आख्यानानां मूल्यनिर्धारणं कर्तव्यम्, यस्मिन् युगे एतेषाम् आख्यानानाम् आविर्भावः अभवत्। अर्वाचीनदृष्ट्या किंवा नवीनदृष्ट्या एतेषां मूल्यनिर्धारणम् इतिहासं प्रति अन्यायं भविष्यति। एतेषां तथ्यानाम् आधारशिलायामुपरि आख्यानानां व्याख्या समुचिता वैज्ञानिका च भविष्यति।

वैदिकाऽऽख्यानानां शिक्षा मानवसमाजस्य सामूहिककल्याणाय विश्वमङ्गलस्य अभिवर्द्धनाय च भवति। भारतीयसंस्कृत्याऽनुसारेण मानवाः देवैः सह सम्बद्धाः सन्ति। मानवो यज्ञेषु देवेभ्यः आहुतिं ददाति। देवोऽपि प्रसन्नो भूत्वा तं प्रसादयति। तस्य अभिलाषं पूरयति। इन्द्रविषयकः अश्विनीविषयकश्च आख्यानम् अस्य कथनस्य विशदो दृष्टान्तः अस्ति। यजमानैः प्रदत्तं सोमरसं पीत्वा इन्द्रो नितान्तं प्रसन्नो भवति। सः तस्य कामनां सफलयति। अवर्षणस्य वृत्राख्यं दैत्यं स्ववज्रेण भित्वा नदीः प्रवाहयति। वृष्ट्या

वेदाध्ययनम्

मानवाः आप्यायिताः भवन्ति। संसारे शान्तिः विराजते। वैदिकतथ्यम् इदमल्पाक्षरेणैव महाकविकालिदासेन व्यक्तिकृतम्(रघु ४/१६)।

प्रत्येकम् आख्यानानाम् अन्तः(सारः) मानवानां शिक्षणार्थम् विद्यते। आत्रेयी–कपालयोः(ऋक् ८/९१) आख्यानं नारीचरित्रस्य उदात्ततायाः तेजस्वितायाश्च विशदं प्रतिपादकमस्ति। राज्ञां त्र्यरुण–त्रैवृष्ण–वृषजानानाम् आख्यानम्(ऋग् ५/२, ताण्ड्यब्रा १३/६/१२, ऋग्विधान १२/५२, बृहद्देवता ५/१४–२३) वैदिककालिकस्य पुरोहितस्य महिम्नो गरिम्णश्च स्पष्टरूपेण सङ्केतं करोति। सोभरिकाण्वस्याख्यानम्(ऋ ८/१९,निरुक्तिः ४/१५,भाग ९/६) सङ्गत्या महिम्नः प्रतिपादयति। उषसतिचाक्रायण (छान्दोग्यः, प्रथ प्रपाठ खण्ड १०/११) इत्येतस्य आख्यानम् अन्नस्य सामूहिकप्रभावस्य तथा गौरवस्य कमनीया कथा अस्ति। शुनःशेपस्याऽऽख्याने देवताऽनुकम्पायाः उज्ज्वलः सङ्केतो मिलति। देवानां कृपया शुनःशेपः स्वात्मानं त्रातुं समर्थः अभवत्। वसिष्ठविश्वामित्रयोः आख्यानम् अपि उचितविश्लेषणाभावेन अनर्गलकल्पनायाः समुत्पादकम् अभवत्। वसिष्ठः शारीरिकतपस्यायाः प्रतिमूर्तिः अस्ति। विश्वामित्रस्तु पुरुषकारस्य स्वरूपम् अस्ति। उभयोः मध्ये प्रगाढा मैत्री आसीत्। वैदिकनृपस्य यज्ञसम्पादने समानरूपेण द्वौ अपि सहायकौ आस्ताम्। तयोः वैरभावः सङ्घर्षश्च क्षणिकः आसीत्। श्यावाश्व–आत्रेयस्य कथा(ऋग् ५/६१) ऋषेः गौरवं, प्रेम्णः महिमानं, कवेः साधनाञ्च सुष्ठु रीत्याऽभिव्यक्तं करोति। ऋग्वेदीययुगस्य इयं प्रख्याता प्रणयकथा अस्ति। यस्यां प्रेम्णः सिद्धये श्यावाश्वः एको मन्त्रद्रष्टा ऋषिः अभवत्। दध्यङ्गाथर्णवस्याऽऽख्यानम्(१/११६/१२,१४/४/५/१३,बृहदारण्य २/५, भागव ६/१०) राष्ट्रिय–मङ्गल–जीवनदानस्य शिक्षां दत्त्वा क्षुद्रस्वार्थाद् उपर्युत्थानस्य जनकल्याणस्य चोपदेशं ददाति। पुराणे अस्य एव नाम ऋषिः दधीचोऽस्ति। अयमेव लोकहिताय वृत्रासुरवधाय सुरेन्द्राय स्वास्थिदानमकरोत्। वज्रनिर्माणार्थम् अस्थिदानं कृत्वा आर्यसभ्यतायाः रक्षाम् अकरोत्। अनधिकारिणं रहस्य–विद्योपदेशस्य विषमपरिणाममस्मिन् वैदिकाऽख्याने प्रदर्शितमस्ति। एतेषामाख्यानानामयमेवोपदेशोऽस्ति यद् –परमेश्वरं प्रति प्रगाढा श्रद्धा जीवात्मना सह प्रेम। विश्वकल्याणाय अयमेव मङ्गलमयः मार्गः अस्ति।

कतिपयानाम् ऋषीणां चारित्रिकदोषाणां तथाऽनैतिकाचरणस्यापि वर्णनं वैदिकाख्यानेषु उपलब्धो भवति। अनेन उपदेशग्रहणं कर्तव्यम्। एतानि आख्यानानि अनैतिकताया गर्ते पतनात् त्राणार्थमेव निर्दिष्टानि सन्ति। तपसा पवित्रजीवनेऽपि प्रलोभनावसरे चारित्रिकपतनस्य सम्भावना भवति। कामिनीकाञ्चनस्य प्रलोभनं सामान्यजनस्य हृदयमाकर्षति एव। फलतः ताभ्यां सदैव जागरूको भवितव्यः भवति। अस्मिन् विषये भारतस्य कथनमिदं ध्यातव्यम्–

'कृतानि यानि कर्माणि दैवतैमुनिभिस्तथा।
न चरेत्तानि धर्मात्मा श्रुत्वा चापि न कुत्सयेत्।।
अनमन्यैरुपालब्धैः कीर्त्तितैश्च व्यतिक्रमैः।

पेशलं चानरूपञ्च कर्तव्यं हितमात्मनः।।' (महाभा १२/२९१/१७)

पाठगतप्रश्नाः -५

२८. आत्रेयी-कपालयोराख्यानं किं प्रतिपादयति।

२९. वसिष्ठः कस्य प्रतिमूर्तिः आसीत्।

३०. विश्वामित्रः कस्य प्रतिमूर्तिरासीत्।

३१. श्यावाश्व-आत्रेयकथायाः का विशिष्टता।

३२. आख्यानानां कः उपदेशः अस्ति।

अथ दार्शनिकानां नये वेदस्य पौरुषेयत्वापौरुषेयत्ववेदविमर्शः

५.६) न्यायदर्शनमते वेदः

नैयायिकाः वेदस्य प्रामाण्यं स्वीकुर्वन्ति,न च वेदस्य अनित्यत्वम् अपौरुषेयत्वम् च इति। तेषां मते परमपुरुषेण वेदाः रचिताः। परमपुरुषः च परमेश्वरः। तस्मात् वेदः पौरुषेयः इति तेषां मतम्। यथा रघुवंशादिकालिदासग्रन्थाः अनित्याः इति।

पाठगतप्रश्नाः -६

३३. कस्य विनाशः अवश्यम्भावी।

३४. नैयायिकानां नये वेदः पौरुषेय अपौरुषेयो वा।

३५. नैयायिकानां नये वेदो नित्यः अनित्यः वा।

३६. नैयायिकमते वेदः केन रचितः।

३७. कः परमपुरुषः।

५.७) मीमांसावेदान्तमते वेदः

मीमांसकाः वैदान्तिकाः च वेदस्य अपौरुषेयत्वं प्रतिपादयन्ति। अपूर्णाः पुरुषाः। अतः तेषां ज्ञानम् अपि न पूर्णमिति। तस्मात् तेषां रचनायां वाक्ये वा भ्रमः प्रमादः विप्रलिप्सा भवति एव। इन्द्रियस्य च अपूर्णताकारणात् दोषाः सम्भवन्ति। परन्तु वेदवाक्ये भ्रमप्रमादादयः दोषाः न सन्ति। तस्मात् वेदः न

पौरुषेयः। सर्वज्ञत्वात् सर्वशक्तिमत्त्वात् च परमेश्वरः तथा रचयितुं शक्तः अस्ति। न च वेदः परमेश्वरेण कृतः। सूर्यरश्मयः यथा सूर्यात् स्वयं प्रकाशिताः भवन्ति तथा वेदः अपि परमेश्वरसकाशात् स्वयं प्रकाशितः। तथाहि आम्नातं बृहदारण्यकोपनिषदि- 'अस्य महतो भूतस्य निःश्वसितं यदेतत् ऋग्वेदो यजुर्वेदः सामवेदः' इति। निःश्वासः यथा स्वाभाविकार्यं न च चेष्टाकृतं तथा वेदः अपि परमेश्वरस्य प्रज्ञास्वरुपः न च चेष्टाकृतः न वा बुद्धिपरिकल्पितः। अत्र ज्ञातृज्ञानयोः अभेदः। प्रति कल्पं परमेश्वरः वेदं स्मरति। न च ब्रह्मा वेदस्य कर्ता, स तु स्मर्ता अर्थात् केवलं स्मरणकर्ता इति। तदुक्तं पराशरसंहितायाम्-'न कश्चित् वेदस्य कर्तास्ति वेदस्मर्ता चतुर्मुखः' इति।

अर्थात् न कोऽपि अस्ति वेदस्य कर्ता। केवलं ब्रह्मा वेदस्य स्मरणकर्ता इति।

ब्रह्मादयः ऋषयः सर्वे स्मारकाः न तु कारकाः। आब्रह्मणः ऋषयः सर्वे एव मन्त्रद्रष्टारः वेदस्य धारकाः वाहकाः वा न च वेदस्य कर्ता रचयिता वा। नित्यं विद्यमानं वेदं परमेश्वरः प्रतिकल्पे ब्रह्मणे ददाति।

'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' इति। वेदः नित्यः किञ्च, सदा विराजमानःअस्ति। प्रतिकल्पे ब्रह्मा तस्य पुनरावृत्तिं करोति। युगान्ते प्रलयकाले वा वेदः परब्रह्मणि अभिन्नरुपेण तिष्ठति। कल्पारम्भे पुनः ऋषयः तपस्याद्वारा वेदमन्त्रान् लभन्ते। तस्माद् उक्तं-

युगान्ते अन्तर्हितान् वेदान् सेतिहासान् महर्षयः।

लेभिरे तपसा पूर्वमनुज्ञाता स्वयम्भूवा।।

यास्कमते ऋषिशब्दास्यार्थः मन्त्रद्रष्टा इति। यास्कमतेन ऋषिशब्दस्य व्युत्पत्तिः-अजानन् ह वै पृश्नीं स्तपस्यमानान् ब्रह्म स्वयम्भू अभ्यानर्षत्तदृषयोऽभवन्। तपस्यरतानां जन्मरहितानाम् अजानाम् ऋषिणां समीपे स्वयं ब्रह्म अर्थात् वेदः अगमत्। मन्त्रद्रष्टा ऋषि इत्युच्यते। निरुक्ते वेदः स्वयम्भूः उत्पत्तिरहितः अपौरुषेयो वा इति।

वेदभाष्यकारः सायनाचार्यः वेदस्य अपौरुषेयत्वं स्वीकृतवान्। भाष्यरचनायाः पूर्वं महेश्वरं प्रणामान् निवेदयति।

'यस्य निःश्वसितं वेदाः यो वेदेभ्योऽखिलं जगत्।

निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम्।।' इति। अर्थात् वेदचतुष्टयात् उत्पन्ननिखिलभुवनं यस्य निःश्वाससस्वरूपः किञ्च, यः सर्वविद्यायाः आधारः तस्मै परमेश्वराय महेश्वराय अहं वन्दे। वेदः महेश्वरस्य निःश्वाससस्वरूपः इत्युक्त्वा सायणाचार्यः वेदस्य अपौरुषेयत्वं प्रतिपादितवान्।

परमेश्वरः वेदस्याधारः न तु रचयिता इति। परमेश्वरस्य वेदकर्तृत्वेन प्रतिपादने वेदस्य अनित्यत्वं किञ्च, परमेश्वरस्य सर्वज्ञत्वाभावापत्तिः इति। परमेश्वरः त्रिकालदर्शी भवति। अतः सः सर्वज्ञः, तस्मात् तस्य न कोऽपि विषयः ज्ञानागम्यः इति वक्तुं न शक्यते। परमेश्वरः वेदं रचितवान् इत्युक्ते सति तस्य सर्वज्ञत्वापत्तिः इति। तस्य सर्वज्ञत्वात् वेदः सर्वदा तस्य ज्ञानगम्यः आसीत् इति। अतः वेदः नित्यः। कल्पभेदे अपि तस्य परिवर्तनं न भवति।

यस्य आदिः नास्ति सः अनादिः इति। आद्योच्चारणे शब्दस्य वाक्यस्य वा कर्तृत्वं प्रतिपाद्यते, किञ्च आद्योच्चारणत्वात् तस्य सदृशत्वम् उच्चारणात् पूर्वं न आसीत् इति ज्ञायते अतः सः शब्दः वाक्यं वा पौरुषेयम् इति। एतदेव पौरुषेयस्य धर्मः वैशिष्ट्यं वा इति। अतः प्रतिकल्पे वेदस्य स्मरणत्वं प्रतिपादितं न तु उच्चारणत्वमिति। ततः प्रतिकल्पे वेदस्य सजातीयोच्चारणत्वमपि प्रतिपद्यते। तेन वेदः अनादिः अनन्तः च इति। तस्मात् वेदः अपौरुषेयः न तु पौरुषेयः इति। यतो हि पुरुषस्य आदिः अस्ति। आदित्वात् तस्य विनाशः अपि अवश्यम्भावी। वेदस्य अपौरुषेयत्वात् तस्य विनाशः नास्ति अतः सः अनादिः अनन्तः नित्यः च इति। अतः परमेश्वरेण साकं वेदस्य सम्बन्धः अपि अनादित्वेन अनन्तत्वेन चेति।

पूर्वमीमांसकानां नये वेदः नित्यः। न च तस्य आधारः परमेश्वरः भवति। पूर्वमीमांसकानां वेदान्तिनां नये ब्रह्म वेदस्य उत्सः आधारो वा। वेदान्तदर्शने ब्रह्मसूत्रे 'शास्त्रयोनित्वात्' इति प्रथमाध्यायस्य तृतीयसूत्रे ब्रह्म वेदचतुष्टयस्य योनिः। अतः वेदस्य कारणं ब्रह्म इति। अस्मिन् सूत्रभाष्ये भगवान् शङ्कराचार्यः - 'न हीदृशस्य शास्त्रस्य ऋग्वेदादिलक्षणस्य सर्वज्ञगुणान्वितस्य सर्वज्ञात् अन्यतः सम्भवोऽस्ति' इति। एवं सर्वविद्यायाः आधारः अखिलधर्ममूलः, वेदशास्त्रस्य उत्स इव सर्वज्ञः ब्रह्म वै नान्यत् किमपि। शुक्लयजुर्वेदस्य शतपथब्राह्मणे आम्नातं 'ब्रह्म एव त्रयीविद्या वा वेदविद्यायाः प्रकाशकः' इति। अतः उक्तं-'ब्रह्म एव प्रथमसृजत त्रयीमेव विद्याम्' (६-१-१४)। कृष्णयजुर्वेदस्य तैत्तिरीयब्राह्मणे ब्राह्मणः वेदस्य उत्सः इत्युक्तम्। अतः तमनु त्रयो वेदा असृजन्त (२-३-१०-१)। वैशेषिकदर्शने तु वेदः ईश्वरस्य वाणी इति।तस्मात् तस्य प्रामाण्यं स्वीक्रियते।

वेदान्तदर्शने पूर्वमीमांसादर्शने च वेदस्य अपौरुषेयत्वं प्रामाण्यत्वञ्च प्रतिपाद्यते। किन्तु वेदस्य नित्यत्वविषये उभयदर्शने प्रस्थानभेदः लक्ष्यते। पूर्वमीमांसादर्शने शब्दस्य नित्यत्वं प्रतिपाद्यते। न्यायदर्शने शब्दस्य अनित्यत्वं प्रतिपाद्यते। जैमिनिन्यायदर्शने शब्दस्य अनित्यत्वं खण्डयित्वा नित्यत्वं च प्रतिपाद्यते। शब्दस्य नित्यत्वे प्रमाणिते वेदस्यापि नित्यत्वं प्रतिपाद्यते। कूटस्थनित्यताप्रवाहनित्यताभेदेन च वेदान्तदर्शने द्विविधा नित्यता। कूटस्थ अर्थात् सर्वदा एकरुपः निर्विकारः। वेदान्तदर्शने परब्रह्मणः कूटस्थनित्यता पारमार्थिकसत्ता च स्वीक्रियते। ब्रह्म वै सर्वे एव अनित्याः इति वेदान्तिनां सिद्धान्तः इति। यस्य आविर्भाविन साकं तिरोभावः अस्ति। यः प्रतिकल्पे अभिव्यक्तो भवति किञ्च, यस्य प्रलयकाले किञ्चित्कालस्य कृते तिरोभावः भवति सा एव प्रवाहनित्यता। तादृशपदार्थस्य कूटस्थनित्यता नास्ति केवलं प्रवाहनित्यता अस्ति। यतो हि कल्पं प्रति तेषां सृष्टिः प्रलयः च भवति। तथा वेदोऽपि प्रलयकाले परमेश्वरे लीयते। कल्पारम्भे पुनः परमेश्वरः वेदं स्मरति। तस्मात् वेदान्ते वेदस्य प्रवाहनित्यता न तु कूटस्थनित्यता स्वीक्रियते। वेदस्य नित्यताप्रसङ्गे वेदान्तिकसिद्धान्तः ब्रह्मसूत्रे प्रतिपादितः अस्ति(१-३-२९)। वाचा विरूपनित्यया इति, अनादिनिधना नित्या वागुत्सृष्टा स्वयमभूवा इति श्रुतिस्मृत्यादिषु वाक्येषु वेदस्य प्रवाहनित्यता उद्घोषिता। पूर्वमीमांसकानां नये एकरूपस्य जगतः प्रवाहनित्यताप्रसङ्गः एव नास्ति। अतः मीमांसादर्शने वेदस्य कूटस्थनित्यता पारमार्थकनित्यता वा स्वीक्रियते।

पाठगतप्रश्नाः ७

३८. मीमांसकानां वैदान्तिकानां वेदो पौरुषेय अपौरुषेयो वा।

३९. पुरुषानां ज्ञानम् अपूर्णं कथम्।

४०. पुरुषाणां रचनायां कथं दोषाः सम्भवन्ति।

४१. कस्मात् वेदः स्वयं प्रकाशितः।

४२. वेदः परमेश्वरस्य किं स्वरुपः।

४३. वेदस्य स्मरणकर्ता कः।

४४. के मन्त्रद्रष्टारः।

४५. प्रतिकल्पे परमेश्वरः वेदं कस्मै ददाति।

४६. प्रलयकाले वेदः कुत्र तिष्ठति।

४७. यास्कमते कः ऋषिशब्दार्थः।

४८. वेदविषये निरुक्तकारमतं किम्।

४९. आचार्यरसायनस्य मतानुसारेण वेदः पौरुषेय अपौरुषेयो वा।

५०. वेदभाष्यकारमते वेदः कस्य किं स्वरुपः।

५१. कः अनादिः।

५२. कः अनादिः।

५३. पूर्वमीमांसकानां वेदो नित्यः अनित्यो वा।

५४. पूर्वमीमांसकानां वेदस्य उत्सः कः।

५५. शास्त्रयोनित्वत् इति सूत्रस्य कः सामान्यर्थतः।

५६. कस्मिन् दर्शने वेदः ईश्वरस्य वाणी।

५७. नैयायिकानां नये शब्दो नित्य अनित्यो वा।

५८. नित्यता कतिविधा। के च ते।

५९. वेदान्तदर्शने ब्रह्मणः कीदृशी नित्यता।

६०. कूटस्थनित्यतायाः साधारणलक्षणं किम्।

६१. प्रलयकाले वेदः कुत्र लीयते।

६२. मीमांसादर्शने वेदस्य कीदृशी नित्यता।

५.८) सांख्यमते वेदः

सांख्यदर्शने वेदस्य नित्यता न स्वीक्रियते किन्तु वेदः अपौरुषेयः। वेदः ऋषिगणकर्तृकः दृष्टः। अतः न कोऽपि वेदस्य रचयिता इति। न कस्यापि स्वस्य मतानुसारेण वेदप्रामाण्यं वेदाविर्भावविषयो वा स्वीक्रियते। तस्माद् वेदः अपौरुषेयः। न कोऽपि वेदकर्तास्वरुपः अस्ति। अतः- न पौरुषेयत्वं तत्कर्तुः पुरुषस्य अभावात् (सांख्यसूत्रं ५-४६)। श्रुतिस्मृत्यनुसारेण प्रतिपादितवेदस्य नित्यता सांख्यमते गुरुशिष्यपरम्परायां वेदस्य अविच्छिन्नप्रवाहः इति। ऋषिगणः उच्चारितवैदिकशब्दसमूहस्य गुरुशिष्यपरम्परायाम् अद्यापि अक्षुण्णरूपेण उच्चारणं भवति। परमेश्वर इव सांख्यपुरुष इव अनादिनित्यता कूटस्थनित्यता वा वेदस्य नास्ति। यतो हि प्रत्येकस्य मन्त्रस्य द्रष्टा कोऽपि ऋषिः इति। अतः तदृषेः पूर्वम् तस्य मन्त्रस्य अस्तित्वं नास्ति इति। आमन्त्रद्रष्टुः गुरुपरम्परापर्यन्तं वेदाध्ययनं निरवच्छिन्नभावेन चलति। तस्मात् यथा पूर्वकल्पे वेदोच्चारणम् अभवत्। तत्सादृशोच्चारणानुसारेण अद्यापि तदेवोच्चारणप्रथा आवहोकालात् चलति। तस्मात् वेदस्य सजातीयोच्चारणप्रवाहस्य नित्यता स्वीक्रियते अर्थात् प्रवाहनित्यता सांख्यदर्शने स्वीक्रियते। न तु अनाद्यनन्तनित्यता इति।

५.९) वैयाकरणमते वेदः

महाभाष्यकारः भगवान् पतञ्जलिः पाणिनिप्रणीतस्य तेन प्रोक्तम् इति सूत्रस्य भाष्ये वेदस्य नित्यताप्रसङ्गे उक्तवान् वेदस्य अर्थाः नित्याः किन्तु शब्दराशिः वर्णानुपूर्वी वा अनित्या इति। तदुक्तं- अर्थो नित्यः , असौ वर्णानुपूर्वी सा तु अनित्या इति। प्रति महाप्रलयं वेदस्य वर्णानुपूर्व्याः अक्षरपरम्परायाः विनाशो भवति। प्रति कल्पं पुनः ऋषिगणः वेदस्य स्मरणं करोति। वर्णराशीनां लोपे सत्यपि वेदस्य अर्थाः नित्याः तिष्ठन्ति। वर्णानुपूर्व्याः भेदवशात् नानाशाखानाम् उत्पत्तिः अभवत्। यथा ऋग्वेदस्य एकविंशतिः, सामवेदस्य सहस्रभेदाः (सहस्रवर्त्मा सामवेदाः) इति। अतः महाभाष्यकारपतञ्जलिमतानुसरेण वेदार्थाः नित्याः, वर्णानुपूर्वी अनित्या चेति। अर्थात् अंशतः नित्यः अंशतः अनित्यः चेति।

न्यायदर्शने वेदस्य शब्दस्य च नित्यता न स्वीक्रियते। वेदस्य अनाद्यनन्तनित्यता अर्थात् कूटस्थनित्यता न स्वीक्रियते। परन्तु प्रवाहनित्याता स्वीक्रियते। मन्त्रायुर्वेदवच्च तत्प्रामाण्यम् आप्तप्रामाण्यात् इति न्यायदर्शनसूत्रभाष्ये वात्स्यायनः उक्तवान् - मन्वन्तरयुगान्तरेषु चातीतानागतेषु सम्प्रदायाभ्यास-प्रयोगाविच्छेदो वेदानां नित्यत्वम् इति अर्थात् अतीते अनागते मन्वन्तरे प्रलयकल्पे सम्प्रदायक्रमे अभ्यासः तस्य प्रयोगश्च निरवच्छिन्नभावेन चलति तदेव वेदस्य नित्यता इति। एतदेव प्रवाहनित्यता इति।

भाष्यकारः सायनाचार्यः वेदस्य अनाद्यनन्तनित्यता न स्वीकरोति। तस्य मते वेदस्य नित्यता एककल्पस्थायी इति। प्रति कल्पं वेदः अभिव्यक्तं भूत्वा प्रलयकाले परमेश्वरे लीयते। अर्थात् उत्से प्रत्यावर्तितो भवति। अतः वेदभाष्यकारस्य आचार्यसायनस्य मतानुसारेण वेदस्य प्रवाहनित्यता इति।

पाठगतप्रश्नाः- ८

६३. सांख्यमते वेदो नित्यः अनित्यो वा।

६४. व्याकरणे मते अर्थाः नित्याः न वा।

पाठसारः

वशिष्ठविश्वामित्रयोः आख्यानम् च्यवानभार्गवस्य तथा मानवीसुकन्याख्यानम् ऊर्वशी-पुरूरवसोः उपाख्यानं शुनःशेपोपाख्यानम् इत्येतानि उपाख्यानानि वयम् अत्र ज्ञातवन्तः। एतद्विहाय वर्तन्ते उपाख्यानान्तराणि बहून्येव। परन्तु विस्तरभयादत्र तानि न उच्यन्ते।

एतदनन्तरं वयं वेदस्य पौरुषेयत्वविषये किञ्चिज्ज्ञातवन्तः। पूर्वमीमांसादर्शने वेदान्तदर्शने सांख्यदर्शने च वेदः अपौरुषेयः केवलं न्यायदर्शने पौरुषेयः इति। पूर्वमीमांसादर्शने वेदस्य कूटस्थनित्यता स्वीक्रियते। वेदान्तदर्शने सांख्यदर्शने न्यायदर्शने च वेदस्य प्रवाहनित्यता स्वीक्रियते न तु कूटस्थनित्यता इति। वैयाकरणानां नये वेदस्यार्थाः नित्याः परन्तु शब्दराशयः अनित्याः इति। श्रुतिस्मृत्यादिग्रन्थे वेदस्य नित्यता स्वीक्रियते। वेदान्तसांख्यन्यायनये वेदस्य कारणं ब्रह्म इति। वेदस्य उत्सत्वात् वेदप्रामाण्यं प्रवाहनित्यता च अस्ति। पूर्वमीमांसकानां नये परमेश्वरः न वेदस्य उत्सः। तेषां नये शब्दः नित्यः। ते जैमिनिन्यायदर्शने प्रमाणितं शब्दस्य नित्यत्वं च खण्डयित्वा शब्दस्य नित्यत्वं प्रतिपादयन्ति। तेषां नये शब्दस्य नित्यत्वात् वेदस्यापि नित्यत्वम् इति।

पाठान्तप्रश्नाः

१. उर्वशीपुरुरवसोः एका रहस्यवादिनीं व्याख्यां लिखत।

२. वसिष्ठविश्वामित्रयोरुपाख्यानं संक्षेपेण लिखत।

३. उर्वश्याः पणत्रयं लिख्यताम्।

४. पुरुरवाः कथम् उर्वश्याः अविच्छिन्नसमागमम् अलभत्।

५. च्यवानभार्गवस्य तथा मानवीसुकन्याख्यानम् कुत्र कुत्र लभ्यते।

६. उर्वश्याः पणत्रयं लिख्यताम्

७. उर्वशी-पुरुरवसोराख्यानं प्रतिपादयत।

८. च्यवानभार्गवस्य तथा मानवीसुकन्याख्यानम् लिखत।

९. वसिष्ठविश्वामित्रयोराख्यानं संक्षेपेण लिखत।

१०. आख्यानानां तात्पर्यं लिखत।

११. शुनःशेपोपाख्यानं लिखत।

१२. न्यायदर्शनमते वेदं प्रतिपादयत।

१३. मीमांसामते वेदं प्रतिपादयत।

१४. सांख्यमते वेदं प्रतिपादयत।

१५. वैयाकरणमते वेदं प्रतिपादयत।

पाठगतप्रश्नानाम् उत्तराणि

उत्तराणि – १

१. हरिश्चन्द्रविश्वामित्रौ

२. वरुणस्य

३. अजीगर्तः।

४. ऋग्वेदे।

५. विश्वामित्रस्य।

६. विश्वामित्रः शुनःशेपाय।

उत्तराणि - २

७. उर्वशीम्

८. राजानं नग्नं दृष्ट्वा

९. उर्वशी एका अप्सराः।

१०. समयं स्वीकृत्य विचार्य स्वकरोत्।

११. सा सदा घृताहारं करिष्यति।

१२. उर्वशीं विना गन्धर्वाः स्वर्गं नीरसं निर्जीवञ्च अनुभूतवन्तः

१३. गन्धर्वाः कपटेन मेषं चोरितवन्तः।

१४. मेषस्य करुणाध्वनिं श्रुत्वा, चौरात् मेषस्य त्राणाय च

१५. राज्ञः नग्नस्थं रूपं प्रेक्ष्य

१६. कुरुक्षेत्रस्य एकस्मिन् जलाशये हंसी-स्वरूपे स्वप्रियम् अपश्यत्

१७. अग्निविद्यानुष्ठानेन

१८. उ विक्रमोर्वशीयनाम त्रोटकम्

१९. पुरुरवाः

उत्तराणि - ३

२०. मानवीसुकन्येति

२१. च्यवानः' इति

२२. मानवीसुकन्या

२३. सौख्यस्य स्तम्भः'

उत्तराणि- ४

२४. ऋग्वेदे

२५. वसिष्ठविश्वामित्रौ

२६. क्षत्रीयः

२७. ब्राह्मणत्वप्राप्त्यर्थम्

उत्तराणि– ५

२८. नारीचरित्रस्य उदात्ततायाः तेजस्वितायाश्च प्रतिपादनम्

२९. शारीरिकतपस्यायाः

३०. पुरुषकारस्य

३१. ऋषेः गौरवं, प्रेम्णः महिमानं, कवेः साधनाञ्च अभिव्यक्तं करोति।

३२. परमेश्वरं प्रति प्रगाढा श्रद्धा जीवात्मना सह प्रेम। विश्वकल्याणाय इदमेव मङ्गलमयं मार्गमस्ति। इत

उत्तराणि - ६

३३. सृष्टस्य ।

३४. पौरुषेयः

३५. नित्यः।

३६. परमपुरुषेण ।

३७. परमेश्वरः।

उत्तराणि - ७

३८. अपौरुषेयः।

३९. ते अपूर्णाः अतः तेषां ज्ञानमपि अपूर्णाः।

४०. भ्रमः प्रमादः विप्रलिप्सा इन्द्रस्य च अपूर्णकारणात् दोषाः सम्भवन्ति।

४१. परमेश्वरसकाशात्।

४२. प्रज्ञास्वरुपः।

४३. ब्रह्मा।

४४. वेदमन्त्रं ये दृष्टवन्तः।

४५. ब्रह्मणे।

४६. परब्रह्मणि अभिन्नरुपेण ।

४७. मन्त्रद्रष्टा।

४८. वेदः स्वयम्भूः अपौरुषेयः।

४९. अपौरुषेयः।

५०. महेश्वरस्य निश्वासस्वरुपः।

५१. यस्य आदिः नास्ति।

५२. यस्य अन्तः नास्ति।

५३. नित्यः।

५४. ब्रह्म ।

५५. ब्रह्म वेदचतुष्टस्य योनिः।

५६. वैशेषिकदर्शने।

५७. अनित्यः।

५८. द्विविधा। कूटस्थनित्यता प्रवाहनित्यता।

५९. कूटस्थनित्यता।

६०. यस्य आविर्भावेन साकं तिरोभावः अस्ति।

६१. परब्रह्मणि।

६२. कूटस्थनित्यता।

उत्तराणि-८

६३. अनित्यः

६४. नित्याः।

॥ इति पञ्चमः पाठः ॥